हाडु: हन्नेरडु

रामगीत्यष्टक

From Shri Bannanje Govindacharya's 14 haadgalu book

**Smt.Shubhalakshmi Rao**

https://www.youtube.com/watch?v=cMRS3-ZtTak&list=PLw00IkkI9sFlROex4L3WPs8QSGWw51TIf&index=10

https://sites.google.com/site/madhwaprameyaqa/ganamruta

नाकिनायकयाचनांचनमाचरन् किल कॆवलं
भास्करान्वयभास्करॊ भगवानभूः शुभसंपदॆ ।
यज्ञपूरुष यज्ञपालक यज्ञसंज्ञ नमॊ~स्तु तॆ
राम राम रमापतॆ रमतां मनस्त्वयि मॆ सदा ॥१॥

जानकीं जननीं जनस्य पुरॆंदिरामतिसुंदरीं
रंजयन् भुवनं जयन् स्वगुणैर्नयैर्विनयैरपि ।
राजराजरमां त्यजन् तृणवद् वनॆ~रमयॊ मुनीन्
राम राम रमापतॆ रमतां मनस्त्वयि मॆ सदा ॥२॥

नाथ मॊहयता खलानखिलांस्त्वया खलु मैथिलि
नैव नैव विनॊगिनी गुरुयॊगिनी स्थिरयॊगिनी ।
उज्जगाविदमब्जभूः शपथॆन तॆ कथयन् कथाः
राम राम रमापतॆ रमतां मनस्त्वयि मॆ सदा ॥३॥

वीरमारुतविक्रमार्चित भानुनंदननंदन
भ्रूविलासविशॆषभीषितवारिधॆ गुणवारिधॆ ।
विश्वभूषण शत्रुभीषण हॆ विभीषणसख्यवन्
राम राम रमापतॆ रमतां मनस्त्वयि मॆ सदा ॥४॥

रावणं जनरावणं सुरवारणप्रतिवारणॆ
सिंहमुग्रबलं शरैर्ननु लीलया निगृहीतवान् ।
सज्जनान् करुणाकरानुगृहीतवान् भगवान् भवान्
राम राम रमापतॆ रमतां मनस्त्वयि मॆ सदा ॥५॥

श्यामलॆ शबळॆ महामणिहॆमभूषणभानुभिः
कॊमलॆ~शनिसन्निभैरकृतव्रणॆ रिपुसायकैः ।
नाथ नूतनयौवनॆ~पि पुराणपूरुषविग्रहॆ
राम राम रमापतॆ रमतां मनस्त्वयि मॆ सदा ॥६॥

उल्लसत्तिलकॆ जगत्तिलकॆ सरॊजविलॊचनॆ
पूर्णचंद्रनिभाननॆ मितभाषणॆ स्मितशॊभनॆ ।
दीर्घदॊष्षि विशालवक्षसि कुंजरॆंद्रगतॆ गतौ
राम राम रमापतॆ रमतां मनस्त्वयि मॆ सदा ॥७॥

लक्ष्मणाग्रज लक्षयॆन्मम वीक्षणं तव वल्लभं
कॊसलॆंद्र कथामलं कथयीत तॆ मम भारती ।
राघव श्रवणं शृणॊतु पराक्रमांस्तव विक्रमान्
राम राम रमापतॆ रमतां मनस्त्वयि मॆ सदा ॥८॥

रामगीतिमिमां शुभां पठतॆ जनाय महादराद्
रामसद्गुणरत्नराजसुराजिराजितमालिकाम्।
राम ऎव रमापती रतिमात्मनः पदपद्मयॊः
राति राति परां गतिं करुणामृतांबुधिरीशिता ॥९॥